# Ardhanarishvari Ashtottarashatanama Stotram

# અર્ધનારીશ્વર્યષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : ardhanArIshvaryaShTottarashatanAmastotram

File name : ardhanAryaShTottarashatanAmastotram.itx

Category : shiva, devii, aShTottarashatanAma, devI, pArvatI

Location : doc_shiva

Proofread by : NA, PSA Easwaran

Latest update : January 13, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# અર્ધનારીશ્વર્યષ્ટોત્તરશતનામસ્તોત્રમ્

ચામુણ્ડિકામ્બા શ્રીકણ્ઠઃ પાર્વતી પરમેશ્વરઃ ।
મહારાજ્ઞીમહાદેવસ્સદારાધ્યા સદાશિવઃ ॥ ૧॥

શિવાર્ધાઙ્ગી શિવાર્ધાઙ્ગો ભૈરવી કાલભૈરવઃ ।
શક્તિત્રિતયરૂપાઢ્યા મૂર્તિત્રિતયરૂપવાન્ ॥ ૨॥

કામકોટિસુપીઠસ્થા કાશીક્ષેત્રસમાશ્રયઃ ।
દાક્ષાયણી દક્ષવૈરી શૂલિનિ શૂલધારકઃ ॥ ૩॥

હ્રીઙ્કારપઞ્જરશુકી હરિશઙ્કરરૂપવાન્ ।
શ્રીમદગ્નેશજનની ષડાનનસુજન્મભૂઃ ॥ ૪॥

પઞ્ચપ્રેતાસનારૂઢા પઞ્ચબ્રહ્મસ્વરૂપભૃત્ ।
ચણ્ડમુણ્ડશિરશ્છેત્રી જલન્ધરશિરોહરઃ ॥ ૫॥

સિંહવાહા વૃષારૂઢઃ શ્યામાભા સ્ફટિકપ્રભઃ ।
મહિષાસુરસંહર્ત્રી ગજાસુરવિમર્દનઃ ॥ ૬॥

મહાબલાચલાવાસા મહાકૈલાસવાસભૂઃ ।
ભદ્રકાલી વીરભદ્રો મીનાક્ષી સુન્દરેશ્વરઃ ॥ ૭॥

ભણ્ડાસુરાદિસંહર્ત્રી દુષ્ટાન્ધકવિમર્દનઃ ।
મધુકૈટભસંહર્ત્રી મધુરાપુરનાયકઃ ॥ ૮॥

કાલત્રયસ્વરૂપાઢ્યા કાર્યત્રયવિધાયકઃ ।
ગિરિજાતા ગિરીશશ્ચ વૈષ્ણવી વિષ્ણુવલ્લભઃ ॥ ૯॥

વિશાલાક્ષી વિશ્વનાથઃ પુષ્પાસ્ત્રા વિષ્ણુમાર્ગણઃ ।
કૌસુમ્ભવસનોપેતા વ્યાઘ્રચર્મામ્બરાવૃતઃ ॥ ૧૦॥

મૂલપ્રકૃતિરૂપાઢ્યા પરબ્રહ્મસ્વરૂપવાન્ ।
રુણ્ડમાલાવિભૂષાઢ્યા લસદ્રુદ્રાક્ષમાલિકઃ ॥ ૧૧॥

મનોરૂપેક્ષુકોદણ્ડ મહામેરુધનુર્ધરઃ ।
ચન્દ્રચૂડા ચન્દ્રમૌલિર્મહામાયા મહેશ્વરઃ ॥ ૧૨॥

મહાકાલી મહાકાલો દિવ્યરૂપા દિગમ્બરઃ ।
બિન્દુપીઠસુખાસીના શ્રીમદોઙ્કારપીઠગઃ ॥ ૧૩॥

હરિદ્રાકુઙ્કુમાલિપ્તા ભસ્મોદ્ધૂલિતવિગ્રહઃ ।
મહાપદ્માટવીલોલા મહાબિલ્વાટવીપ્રિયઃ ॥ ૧૪॥

સુધામયી વિષધરો માતઙ્ગી મુકુટેશ્વરઃ ।
વેદવેદ્યા વેદવાજી ચક્રેશી વિષ્ણુચક્રદઃ ॥ ૧૫॥

જગન્મયી જગદ્રૂપો મૃડાની મૃત્યુનાશનઃ ।
રામાર્ચિતપદામ્ભોજા કૃષ્ણપુત્રવરપ્રદઃ ॥ ૧૬॥

રમાવાણીસુસંસેવ્યા વિષ્ણુબ્રહ્મસુસેવિતઃ ।
સૂર્યચન્દ્રાગ્નિનયના તેજસ્ત્રયવિલોચનઃ ॥ ૧૭॥

ચિદગ્નિકુણ્ડસમ્ભૂતા મહાલિઙ્ગસમુદ્ભવઃ ।
કમ્બુકણ્ઠી કાલકણ્ઠી વજ્રેશી વજ્રપૂજિતઃ ॥ ૧૮॥

ત્રિકણ્ટકી ત્રિભઙ્ગીશઃ ભસ્મરક્ષા સ્મરાન્તકઃ ।
હયગ્રીવવરોદ્ધાત્રી માર્કણ્ડેયવરપ્રદઃ ॥ ૧૯॥

ચિન્તામણિગૃહાવાસા મન્દરાચલમન્દિરઃ ।
વિન્ધ્યાચલકૃતાવાસા વિન્ધ્યશૈલાર્યપૂજિતઃ ॥ ૨૦॥

મનોન્મની લિઙ્ગરૂપો જગદમ્બા જગત્પિતા ।
યોગનિદ્રા યોગગમ્યો ભવાની ભવમૂર્તિમાન્ ॥ ૨૧॥

શ્રીચક્રાત્મરથારૂઢા ધરણીધરસંસ્થિતઃ
શ્રીવિદ્યાવેદ્યમહિમા નિગમાગમસંશ્રયઃ ॥ ૨૨॥

દશશીર્ષસમાયુક્તા પઞ્ચવિંશતિશીર્ષવાન્ ।
અષ્ટાદશભુજાયુક્તા પઞ્ચાશત્કરમણ્ડિતઃ ॥ ૨૩॥

બ્રાહ્મ્યાદિમાતૃકારૂપા શતાષ્ટેકાદશાત્મવાન્ ।
સ્થિરા સ્થાણુસ્તથા બાલા સદ્યોજાત ઉમા મૃડઃ ॥ ૨૪॥

શિવા શિવશ્ચ રુદ્રાણી રુદ્રશ્ચૈવેશ્વરીશ્વરઃ ।
કદમ્બકાનનાવાસા દારુકારણ્યલોલુપઃ ॥ ૨૫॥

નવાક્ષરીમનુસ્તુત્યા પઞ્ચાક્ષરમનુપ્રિયઃ ।
નવાવરણસમ્પૂજ્યા પઞ્ચાયતનપૂજિતઃ ॥ ૨૬॥

દેહસ્થષટ્ચક્રદેવી દહરાકાશમધ્યગઃ ।
યોગિનીગણસંસેવ્યા ભૃઙ્ગ્યાદિપ્રમથાવૃતઃ ॥ ૨૭॥

ઉગ્રતારા ઘોરરૂપશ્શર્વાણી શર્વમૂર્તિમાન્ ।
નાગવેણી નાગભૂષો મન્ત્રિણી મન્ત્રદૈવતઃ ॥ ૨૮॥

જ્વલજ્જિહ્વા જ્વલન્નેત્રો દણ્ડનાથા દૃગાયુધઃ ।
પાર્થાઞ્જનાસ્ત્રસન્દાત્રી પાર્થપાશુપતાસ્ત્રદઃ ॥ ૨૯॥

પુષ્પવચ્ચક્રતાટઙ્કા ફણિરાજસુકુણ્ડલઃ ।
બાણપુત્રીવરોદ્ધાત્રી બાણાસુરવરપ્રદઃ ॥ ૩૦॥

વ્યાલકઞ્ચુકસંવીતા વ્યાલયજ્ઞોપવીતવાન્ ।
નવલાવણ્યરૂપાઢ્યા નવયૌવનવિગ્રહઃ ॥ ૩૧॥

નાટ્યપ્રિયા નાટ્યમૂર્તિસ્ત્રિસન્ધ્યા ત્રિપુરાન્તકઃ ।
તન્ત્રોપચારસુપ્રીતા તન્ત્રાદિમવિધાયકઃ ॥ ૩૨॥

નવવલ્લીષ્ટવરદા નવવીરસુજન્મભૂઃ ।
ભ્રમરજ્યા વાસુકિજ્યો ભેરુણ્ડા ભીમપૂજિતઃ ॥ ૩૩॥

નિશુમ્ભશુમ્ભદમની નીચાપસ્મારમર્દનઃ ।
સહસ્રામ્બુજારૂઢા સહસ્રકમલાર્ચિતઃ ॥ ૩૪॥

ગઙ્ગાસહોદરી ગઙ્ગાધરો ગૌરી ત્રયમ્બકઃ ।
શ્રીશૈલભ્રમરામ્બાખ્યા મલ્લિકાર્જુનપૂજિતઃ ॥ ૩૫॥

ભવતાપપ્રશમની ભવરોગનિવારકઃ ।
ચન્દ્રમણ્ડલમધ્યસ્થા મુનિમાનસહંસકઃ ॥ ૩૬॥

પ્રત્યઙ્ગિરા પ્રસન્નાત્મા કામેશી કામરૂપવાન્ ।
સ્વયમ્પ્રભા સ્વપ્રકાશઃ કાલરાત્રી કૃતાન્તહૃત્ ॥ ૩૭॥

સદાન્નપૂર્ણા ભિક્ષાટો વનદુર્ગા વસુપ્રદઃ ।
સર્વચૈતન્યરૂપાઢ્યા સચ્ચિદાનન્દવિગ્રહઃ ॥ ૩૮॥

સર્વમઙ્ગલરૂપાઢ્યા સર્વકલ્યાણદાયકઃ ।

રાજેરાજેશ્વરી શ્રીમદ્રાજરાજપ્રિયઙ્કરઃ ॥ ૩૯॥

અર્ધનારીશ્વરસ્યેદં નામ્નામષ્ટોત્તરં શતમ્ ।
પઠન્નર્ચન્સદા ભક્ત્યા સર્વસામ્રાજ્યમાપ્નુયાત્ ॥ ૪૦॥

ઇતિ સ્કાન્દમહાપુરાણે અર્ધનીરીશ્વર્યષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Ardhanarishvari Ashtottarashatanama Stotram*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*